National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 08-11
© 2026 NJHSR
www.sanskritarticle.com

**Kabery Hossain**
Assistant Professor,
Serampore Girls' College,
West Bengal

**Correspondence:**
**Kabery Hossain**
Assistant Professor,
Serampore Girls' College,
West Bengal

# आचार्यशङ्कस्य परमाणुकारणतावादखण्डनयुक्तेः विमर्शः

**Kabery Hossain**

वेदान्तिनः व्रह्म जगतः निमित्तोपादानोभयकारणमिति वर्णयन्ति। एतन्मतं नैयायिकाः न स्वीकुर्वन्ति। व्रह्मसूत्रभाष्ये द्वितीये अध्याये द्वितीये पादे शङ्कराचार्यप्रणीते व्रह्मकारणतावादे नैयायिकाः दोषमुद्भावयन्ति। स च दोषः एवं यत्, " उपादानकारणकार्ययोः मध्ये एवं नियमः अस्ति यत्, कारणगुणाः हि कार्यगुणान् आरभन्ते " इति। तथाहि, कृष्णपटस्य कृष्णरूपं प्रति कारणं हि तन्तुगतं कृष्णरूपम्। ततश्च जगतः जड़त्वं प्रति तस्य उपादानकारणस्य जड़त्वं कारणमिति वाच्यम्। ततश्च जगतः उपादानकारणस्य व्रह्मणः जड़त्वमापद्यते इति दोषः। अथवा यदि व्रह्मणः चेतनत्वात् ततः जायमानस्य जगतः अपि चेतनत्वापत्तिः भवति इति दोषः जायते।

अत्र वेदान्तिनः वदन्ति, यदि " कारणगुणाः हि कार्यगुणान् आरभन्ते " इति नियमः नैयायिकैः अपि सर्वत्र स्वीक्रियते, तदा नैयायिका एवं दोषम् उद्भावयितुं योग्या भवेयुः। न च तथा वस्तुस्थितिः अस्ति। नैयायिकाः अपि सर्वत्र तं नियमं न स्वीकुर्वन्ति। तथाहि, नैयायिकानां मते क्षित्यादिः परमाणुः स्वसजातीयेन क्षित्यादिना परमाणुना सह संयुज्यते। ततः द्व्यणुकमुत्पद्यते। ततः द्वणुकत्रयं परस्परं संयुज्यते। ततः एकं त्र्यणुकं जायते। ततः चतुर्भिः त्र्यणुकैः एकं चतुरणुकं जायते। अनेन क्रमेण स्थूलं जगत् उत्पन्नं भवति इति परमाणुकारणतावादिनां नैयायिकानां वैशेषिकाणां च मतम्।

तथाहि प्रश्नः भवति, त्र्यणुकपरिमाणं प्रति "कारणगुणाः कार्यगुणान् आरभन्ते" इति न्यायेन द्व्यणुकगतं परिमाणमेव कारणं वाच्यम्। न च नैयायिकाः तथा स्वीकुर्वन्ति। अत्र शङ्कराचार्याः कथयन्ति यत् , यथा भवन्तः नैयायिकाः द्व्यणुकगतं अनुपरिमाणं तत्कार्यवभूतत्रणुकपरिमाणं महतपरिमाणं प्रति कारणमिति न स्वीकुर्वन्ति, तथा वयमपि वेदान्तिनः उक्तनियमम् अत्र जगदुत्पत्तिविषये न स्वीकुर्मः। ततः व्रह्म यद्यपि चेतनं तथापि ततः जायमाने जगति न चेतनत्वं विद्यते इति वेदान्तिनः समाधानं कथयन्ति।

अत्र ततः परं नैयायिकपक्षतः किं समाधानं भवेदिति न किञ्चित् तत्र उल्लेखितम्। अत्र अस्माकं विशेषः विचारः वर्तते। अत्र वोध्यं भवति यत्, यद्यपि सर्वत्र अयं सामान्यः विधिः यत्, कारणगुणान् आरभन्ते, तथापि स च नियमः सति वाधके त्यज्यते। द्व्यणुकपरिमाणात् त्र्यणुकपरिमाणं जायते इति स्वीकारे नियमान्यरभङ्गप्रसङ्गः वाधः तिष्ठति।

अतएव अत्र कारणगुणाः हि कार्यगुणान् आरभन्ते इति नियमः न स्वीक्रियन्ते। कः अत्र वाधः? अत्रोच्यते , अयं हि नियमः परिमाणं यदा परिमाणान्तरस्य उत्पादकं भवति, तदा परिमाणं स्वसजातीयं स्वोत्कृष्टं परिमाणान्तरं जनयेत्। परिमाणानस्य स्वजातीयस्वोत्कृष्टपरिमाणान्तरजनकत्वनियमात्। ततः तदनुसारेण यदा द्वणुकपरिमाणम् अनुपरिमाणं त्र्यणुकपरिमाणं जनयेत्, तदा त्र्यणुकपरिमाणम् अणुतरं स्यात्। तदा जगतः अणुतरत्वप्रसङ्गः आपद्येत। नैयायिकाः अत्र वाधविशेषत्त्वात् " कारणगुणाः हि " इति नियमं न स्वीकुर्वन्ति, इति विषये केवलं तादृशस्थले नैयायिकान् उपमानीकुर्वन्ति। ते अतिरिक्तयुक्तिं न

प्रदर्शयन्ति। नैयायिकाः यथा बाधविशेषं युक्तिरूपेण दर्शयन्ति, न तथा ते वेदान्तिनः वदन्ति। ततः अत्र शङ्कराचार्यैः काशकुशावलम्वनयुक्तिमाश्रितवन्तः इत्यत्र शङ्कराचार्यप्रदर्शितयुक्तौ दुर्वलता अस्ति इति भन्ये।

शङ्कराचार्यैः न्यायवैशेषिकसम्मतपरमाणुकारणतावादखण्डनाय एवम् उच्यते यत्, अनवस्थादोषवशात् परमाणुकारणतावादः स्वीकर्तुं न शक्यते। तथाहि परमाणुद्वयसंयोगः परमाणुद्वये समवायसम्वन्धेन तिष्ठति। यतो हि नैयायिकैः गुणगुणिनोः समवायः सम्वन्धः भवति इति स्वीक्रियते। किन्तु स समवायः पुनः परमाणौ केन सम्वन्धेन तिष्ठेत्? कः अपि सम्बन्धः स्वीकरणीयः एव, सम्वन्धस्य द्विनिष्ठत्वनियमात्। अत्र शङ्कराचार्याः कथयन्ति, स च सम्वन्धः संयोगो यद्यपि न भवति, सम्वन्धिनोः उभयोः द्रव्यत्वाभावात्, तथापि समवायः सम्वन्धः कल्पयितुं शक्यते। यदि उच्यते संयोगो गुणः पदार्थः इति तदतिरिक्तेन समवायसम्वन्धेन तिष्ठति, किन्तु समवायः न गुणः पदार्थः इति न स पुनः समवायसम्वन्धेन स्थातुं योग्य इति। तदपि न वाच्यम्। यतो हि केनापि सम्वन्धेन वृत्तिनिमित्तं न हि सम्वन्धिना गुणेण भाव्यम्। तदुक्तं व्रह्मसूत्रशाङ्करभाष्ये - "नन्विहप्रत्ययग्राह्यः समवायो नित्यसम्वन्ध एव समवायिभिर्गृह्य-तेनासम्वद्धः सम्वन्धान्तरापेक्षा वा। ततश्च न तस्यान्यः सम्वन्धः कल्पयितव्यः, येनानवस्था प्रसज्येत। नेत्युच्यते। संयोगोऽप्येवं, सति संयोगिभिर्नित्यसम्वन्ध एवति सम्वन्धान्तरमपेक्षेत। अर्थान्तरत्वात् संयोगः सम्वन्धान्तरमपेक्षेत, समवायेऽपि तर्ह्यर्थान्तरत्वात् सम्वन्धान्तरमपेक्षेत। न च गुणत्वात् संयोगः सम्वन्धान्तरपेक्षते, न समवायोऽगुणत्वादिति युज्यते वक्तुम्। अपेक्षाकारणस्य तुल्यत्वात्, गुणपरिभाषायाश्चातन्त्रात्। तस्मादर्थान्तरं समवायमभ्युपगच्छतः प्रसज्येतैवानवस्था। प्रसज्यमानायाञ्चानवस्थायामेकासिद्धौ सर्वा-सिद्धेर्द्वाभ्यामणुभ्यां द्व्यणुकं नैवोत्पद्येत। तस्मादप्यनुपपन्नः परमाणु-कारणवादः " इति।

ततः परमाणुद्वयसंयोगः समवायेन परमाणौतिष्ठति। स च समवायः पुनरपि समवायेन परमाणौ तिष्ठति। सः अपि समवायः समवायत्वात् पुनः समवायेन सम्वन्धेन परमाणौ तिष्ठेत्। सः अपि समवायेन इति एवं क्रमेण अनवस्थादोषः प्रसक्तः भवति। तद्दोषभयात् नैयायिकैः परमाणुकारणतावादः न स्वीकर्तव्यः इति शङ्कराचार्याणाम् आशयः।

अत्र अस्माकं मते शङ्कराचार्यैः यो दोषः दर्शितः स न युक्तः। कथम्? नैयायिकमतमाश्रित्य एव नैयायिकमतमते दोषः उपस्थाप्यते, स च प्रकृतः दोषः इति गण्यते। तथा नास्ति। न न हि परमाणुद्वयसंयोगस्य परमाणौ यः समवायसम्वन्धेन वृत्तित्वं नैयायिकैः स्वीक्रियते, तस्य समवायस्य पुनः समवायेन वृत्तित्वं

नैयायिकैः स्वीक्रियते, तस्य समवायस्य पुनः समवायेन वृत्तित्वं
नैयायिकैः न स्वीक्रियते, भवता वेदान्तिना वलादुच्यते। कथं समवायः समवायेन तिष्ठेत्? समवायः हि पञ्चसु स्थलेषु तिष्ठति। गुणगुणिणोः,क्रियिकरियावतोः, जातिजातिमतोः, अवयवावयविनोः, विशेषनित्यद्रव्ययोश्च समवायस्तिष्ठति इति नैयायिकवैशेषिकाणां मतम्। न हि एतेषु एकतमोऽपि अत्र युज्यते।अतः नैयायिकानां मते समवायः स्वरूपेण सम्वन्धेन तिष्ठति। इदानीं यदि इमं स्वरूपसम्वन्धमादाय यदि दोषमुपस्थापयेत्, तदा तत् समीचीनं स्यात्। न च आचार्यशङ्करैः तथा आचरितम्। अतः अयं दोषः न दोषायः। अत्रापि काशकुशावलम्वनापत्तिः दृश्यते।

आचार्यशङ्करैः परमाणुकारणतावादखण्डनप्रसङ्गे उक्तं यत्, परमाणुसंयोगः परमाणकर्मजन्यः। येन अदृष्टेन च परमाणुषु कर्म उत्पद्यते, तत्रापि दोषः वर्तते। कथम्? नैयायिकवैशेषिकनये संयोगः त्रिविधः। एकतरकर्मजन्यः, उभयकर्मजन्यः, संयोगजसंयोगः चेति। तत्र संयोगजसंयोगस्य प्रकृते असम्भवात् अवशिष्टपक्षद्वयं भवितुमर्हति। तत्रापि एकतरकर्मजन्यत्वकल्पे विनिगमनाभावात् अवसानतः उभयकर्मजन्यत्वपक्षः स्वीकृयते। अत्र प्रश्नः भवति कस्मात् कारणात् परमाणुषु कर्म उत्पन्नं भवति? किं स्वाभाविकं तत् कर्म अथवा तत् नैमित्तिकं? यदि स्वाभाविकं तदा प्रवृत्तिस्वभावत्वे सदैव सर्गः स्यात्, न प्रलयः घटेत। निवृत्तिस्वभावत्वपक्षे सदैव प्रलयावस्था, सर्गः असिद्धः भवेत्। यदि कर्म नैमित्तिकम् इति उच्यते तदा प्रश्नः किं तत् निमित्तम्?

अत्र उच्यते नैयायिकैः तत् निमित्तं हि अदृष्टम्। किन्तु अत्र शङ्कराचार्याः कथयन्ति तत् अदृष्टं भोगप्रसिद्ध्यर्थं स्वीक्रियते, न प्रलयप्रसिद्ध्यर्थम्। तदुक्तं तेन - " यथा चादिसर्गे निमित्ताभावात् संयोगोत्पत्त्यर्थं कर्म्म नाणूनां सम्भवति, एवं महाप्रलयेऽपि विभागोत्पत्त्यर्थं कर्म्म नैवाणूनां सम्भवेत्। न हि तत्रापि किञ्चिन्नियतं तन्निमित्तं दृष्टमस्ति। अदृष्टमपि भोगप्रसिद्धर्थं, न प्रलयप्रसिद्ध्यर्थ-मित्येतो निमित्ताभावान्न स्यादणूनां संयोगोत्पत्त्यर्थं विभागोत्पत्त्यर्थं वा कर्म्म। अतश्च संयोगविभागाभावात् तयोः सर्गप्रलयोरभावः प्रसज्येत। तस्मादनुपपन्नोऽयं परमाणुकारणवादः " इति।

तदेतन्न युक्तम्। कथम्? अदृष्टं हि पापं पुण्यं च। तत् सुखदुः खकारणम्। सुखदुः खभोगः यथा सृष्टौ सम्भवति, तथा प्रलये अपि अदृष्टप्रयोजकता अस्ति। यावत् पुण्यपापादिकं तावदेव भोगः। यदि सर्वेषां जीवानाम् अदृष्टपरिमाणानुसारं युगपद्वृत्तिनिरोधः भवति, तदा प्रलये न वाधकं किञ्चित् पश्यामः। अतः परमाणकारण-तावादे परमाणुकर्मणाम् अदृष्टकारित्वकथनेन न सर्गप्रलययोः अनुपपत्तिः अस्ति। अतः शङ्कराचार्यैः उपस्थापितः दोषः न दोषः।

नैयायिकैः वैशेषिकैः च क्षित्यप्तेजोवायवः चतुर्विधाः परमाणवः नित्यः इति स्वीक्रियते। आचार्यशङ्करमते तन्न यथार्थम्, निरावलम्वनत्वात् इति परमाणुकारणतावादः न सम्यक् इति। तदुक्तं शङ्कराचार्यैः - "सावयवानां द्रव्यानाम् अवयवशः विभज्यमानानां यतः परः विभागः न सम्भवति, ते चतुर्विधाः रूपादिमन्तः परमाणवः चतुर्विधस्य रूपादिमतः भूतभौतिकस्य आरम्भकाः नित्यानाच इति यत् वैशेशिकाः अभ्युपगच्छन्ति, स तेषाम् अभ्युपगमः निरालम्वनः एव। यतः रूपादिमत्त्वात् परमाणुनाम् अणुत्वनित्यत्वप्रसज्येत। " इति।

तत्र अस्माकं मते तदेतत् खन्डनं न युक्तम्। कथम्? यत् खलु निरावलम्वनमिति उक्तं , तदाभासयुक्तम्। सूक्ष्मेक्षिकया यदि विचारः क्रियते, तदा स्पष्टं भवति यत् , क्षित्यादिपरमाणूनां यत् गन्धादिमत्त्वं नित्यत्वं च स्वीकृतम्, तन्न नैयायिकानां कल्पनामात्रम् अपि तु प्रमाणगर्भम्। तथाहि भवतामाक्षेपः कुत्र? किं विवादः परमाणूनां नित्यत्वे आहोस्वित् क्षित्यादिपरमाणूनां गन्धादिमत्त्वे? नाद्यः पक्षः सम्भवति। यतो हि घटादीनां द्व्यणुकपर्यन्तानाम् द्रव्याणाम् अवयवविभागात् अनित्यत्वम् अस्ति। द्व्यणुकस्य च परमाणौ पर्यवसानम्। परमाणुरपि न सावयवः। अतः परमाणुः अन्तिमः पदार्थः निरवयवः स्वीक्रियते। इदानीं परमाणूनां यदि नित्यत्वं न स्वीक्रियते, तदा अनित्यत्वमेव वाच्यम्। परमाणुः तदा सावयवः वाच्यः। तस्य च अवयवः पुनः भवतां मतानुसारेण अवयवशः विभज्यते। तेन अनवस्थादोषः भवेत्। एवम् अनवस्थादोषवारणाय कुत्रापि अवयवविभागस्य विश्रामः वाच्यः। तस्य च अन्तिमस्य पदार्थस्य पुनः अवयवतः विभागः नास्ति इति वाच्यः। स एव अस्माकं मते निरवयवः परमाणुः। अतः परमाणूनां नित्यत्वं स्वीकरणीयम्।

न द्वितीयः पक्षः सम्भवति। कुतः? यदि तावत् क्षित्यादिः परमाणुः गन्धादिशून्यः स्वीक्रियते, तदा कार्यपृथिव्यादिपदार्थे अपि गन्धादिः न स्यात्। यतो हि नियमः वर्तते, "कारणगुणाः हि कार्यगुणान् आरभन्ते" इति। ततश्च परमाणुः यदि निर्गुणः, तदा कार्यं जगदपि निर्गुणं स्यात्। दृश्यते च जगत् गन्धादियुक्तं सगुणम्। ततश्च उक्तनियमेन तत्तत्कारणे अपि गुणः स्वीकरणीयः। अनेन प्रकारेण क्षित्यादिपरमाणौ अपि गन्धादिगुणः स्वीक्रियते इति न काचन् अनुपपत्तिः। अतः क्षित्यादिः परमाणुः गन्धादिमानपि नित्यः अपि इति स्वीकरणीयम्। अतः शङ्कराचार्यैः यत् खलु उक्तं, निरावलम्वनमेतत्, तन्न युक्तिसहम्।

शङ्कराचार्याः एवं कथयन्ति यत्, प्रधानकारणतावादः हि सत्कार्यवादानुकूलत्वेन केचन दार्शनिकाः तथापि स्वीकुर्वन्ति, तथापि परमाणुकारणतावादः असत्कार्यवादिनां नैयायिकानां वैशेषिकाणाञ्च केचनापि अन्ये दार्शनिकाः न अनुमन्यन्ते। अतः अत्यन्तमपरिग्रहात् परमाणुकारणतावादः न स्वीकरणीयः।

तदेतन्मतमपि न युक्तम्। कथम्? अन्ये न स्वीकुर्वन्ति इति कृत्वा न स्वीकरणीयः, अस्माभिः नैयायिकैः वैशेषिकै: सांख्यैः च भवतां च मयस्य अस्वीकारात्। यदि च उच्यते द्वितीयः पक्षः। सः अपि पक्षः न सम्यक्, अयं नास्ति आवश्यिकः नियमः। यत्, केनापि न स्वीक्रियते इति कृत्वा न स्वीकर्तव्य इति। नूतनं किमपि मतं प्रथमस्वीकृतत्वेनैव नूतनं भवति। भवतामपि मतं नूरनदशायाम् प्राथमिकमदशायां केनापि न स्वीकृतम्। स्वीकृतपूर्वं चेत् नूतनत्वहानिः। नूतनं चेत्, तदापि अन्येन केनापि अस्वीकारात् भवतां मतस्य भवन्न्यायेनैव अप्रामाणिकत्वापत्तिः स्यात्। ध्वनितत्तवमपि पूर्वमस्वीकृतमासीदिति किं तत् अप्रामाणिकम्? अतः इयमपि युक्तिः आचार्यशङ्कराणां न यथार्था इति वोध्यम्।

**<u>ग्रन्थपञ्जीः</u>**


- न्यायदर्शनम् (द्वितीयखण्डः), महर्षिगोतमकृतम्, पण्डितश्रीयुक्त-फणिभूषणतर्कवागीशेन सम्पादितम्, कलिकातायां पश्चिमवङ्ग-राज्य-पुस्तकपर्षत्प्रकाशनतः प्रकाशितम्, १९८४ आङ्गलाव्दे।
- न्यायदर्शनम्(तृतीयखण्डः),महर्षिगोतमकृतम्, पण्डितश्रीयुक्तफणि-भूषणतर्कवागीशेन सम्पादितम्, कलिकातायां पश्चिमवङ्ग-राज्य-पुस्तकपर्षत्प्रकाशनतः प्रकाशितम्, १९८२ आङ्गलाव्दे।
- न्यायदर्शनम्(चतुर्थखण्डः), महर्षिगोतमकृतम्, पण्डितश्रीयुक्तफणि-भूषणतर्कवागीशेन सम्पादितम्, कलिकातायां पश्चिमवङ्ग-राज्य-पुस्तकपर्षत्प्रकाशनतः प्रकाशितम्, १९८८ आङ्गलाव्दे।
- न्यायदर्शनम्, महर्षिगोतमप्रणीतं, श्रीनारायणचन्द्रमिश्रेण सम्पादितं, वाराणस्यां चौखम्मा-संस्कृतसंस्थानतः प्रकाशितः, २०४७ ईशवीयाव्दे।
- वेदान्तदर्शनम् (प्रथमोऽध्यायः), महर्षिकृष्णद्वैपायनवादरायण-भगवदावेदव्यासप्रणीतम्, महामहोपाध्यायपण्डितदुर्गाचरणसांख्य-वेदान्ततीर्थेन प्रतिसंस्कृतं सम्पादितं च, कलिकातायां देवसाहित्य-कुटिरप्राइभेटप्रतिष्ठानतः प्रकाशितम्, २०१७ आङ्गलाव्दे।
- वेदान्तदर्शनम् (द्वितीयोऽध्यायः), महर्षिकृष्णद्वैपायनवादरायण-भगवदावेदव्यासप्रणीतम्, महामहोपाध्यायपण्डितदुर्गाचरणसांख्य-वेदान्ततीर्थेन प्रतिसंस्कृतं सम्पादितं च, कलिकातायां देवसाहित्य-कुटिरप्राइभेटप्रतिष्ठानतः प्रकाशितम्, २०१७ आङ्गलाव्दे।

- वेदान्तदर्शनम् (प्रथमोऽध्यायः), महर्षिकृष्णद्वैपायनवादरायण-भगवदावेदव्यासप्रणीतम्,स्वामीविश्वरूपानन्देन अनूदितं व्याख्यातं च, स्वामीचिद्घनानन्दपुरी श्रीआनन्दझान्यायाचार्य्येन च सम्पादितम्, कलिकातायां उद्बोधनकार्यालयतः प्रकाशितः, १९८० आङ्गलाब्दे।
- वेदान्तदर्शनम् (द्वितीयोऽध्यायः), महर्षिकृष्णद्वैपायनवादरायण-भगवदावेदव्यासप्रणीतम्, स्वामीविश्वरूपानन्देन अनूदितं व्याख्यातं च, स्वामीचिद्घनानन्दपुरी श्रीआनन्दझान्यायाचार्य्येन च सम्पादितम्, कलिकातायां उद्बोधनकार्यालयतः प्रकाशितः, १९९६ आङ्गलाब्दे।
- सर्वदर्शनसंग्रहः, श्रीमत्सायनमाधवाचार्यप्रणीतः, अभ्यङ्करपाहावा वासुदेवशास्त्रिविरचितया दर्शनाङ्कुराभिधया व्याख्याया समेतः, मुम्वय्यां निर्णयसागरमुद्रणालयात् प्रकाशितः, १९२४ ईशवीयाब्दे।
- सर्वदर्शनसंग्रहः, (प्रथमखण्डः), श्रीमत्सायनमाधवाचार्यप्रणीतः, श्रीसत्यज्योतिचक्रवर्तीना सम्पादितम्, कलिकातायां साहित्यश्री-प्रकाशनतः प्रकाशितः, १३५१ वङ्गाब्दे।
- सर्वदर्शनसंग्रहः, (द्वितीयखण्डः), श्रीमत्सायनमाधवाचार्यप्रणीतः, श्रीसत्यज्योतिचक्रवर्तीना सम्पादितम्, कलिकातायां साहित्यश्री-प्रकाशनतः प्रकाशितः, १३५१ वङ्गाब्दे।
- सर्वदर्शनसंग्रहः सायणमाधवीयः टिजिमणिकरसम्पादितः अभ्यङ्करटीकासहितः पुनास्थितभाण्डारकररिसर्च - इन्स्टिटिउट्-प्रतिष्ठानतः १९७८ ईशबीयवर्षे प्रकाशितः।